कक्षा–आचार्य प्रथमवर्ष
चतुर्थपत्रम् व्याकरण
विषयः व्याकरण

प्रेषकः

प्रो. भारतभूषण त्रिपाठी
राष्ट्रियसंस्कृतसंस्थानम्
लखनऊपरिसरः, लखनऊ

आचार्य I चतुर्थपत्र (1)
व्याकरण-प्रो०भारतभूषण

प्र० नैयायिकानां मते प्रादयो द्योतकाः वाचकाः वा

उ० नैयायिकानां मते प्रादयो द्योतकाः ।

प्र० चादयो द्योतकाः वाचकाः वा तत्र नैयायिकाभिमतं निरूपयत ।

उ० नैयायिकाः चादयो वाचकाः इति स्वीकुर्वन्ति।

प्र० वैयाकरणाः निपातानां द्योतकत्वं वाचकत्वं वा किं निरूपयन्ति

उ० वैयाकरणाः निपातानां द्योतकत्वं स्वीकुर्वन्ति।

प्र० वैयाकरणानां मते निपातानां द्योतकत्वे किं प्रमाणम् ।

उ० अनुभवति इत्यत्र योऽयमनुभवरूपोऽर्थः प्रतीयते सोऽर्थः भू धातोरेव वर्तते, अतएव अनुभूयते इत्यत्र भूधातोः कर्मणि लकारः सिध्यति। तथैव साक्षात्क्रियते, अलङ्क्रियते, इत्यत्रापि साक्षात्काररूपोऽर्थः, अलङ्कारार्थश्च कृधातोरेव वर्तते, न तु साक्षात्, अलम्, इति निपातयोः ।

(2)

प्र० 'अनुभवति' इत्यत्र अनुभवार्थवाचको निपातः 'अनु' इत्येव स्यात् का हानिः ?

उ० अनुभवार्थवाचकोऽनु इति निपातः स्यात् तद। अनुगच्छति इत्यत्र अनुनिपातस्य विद्यमानत्वे सति अनुभवार्थस्य प्रतीतिः स्यात्। अनुभूयते इत्यत्र भूधातोः कर्मणि लकारो न सिध्यति भूधातोरकर्मकत्वात्। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम् इति व्युत्पत्त्या अनुभवार्थस्योपसर्गवाच्यत्वे सति लडर्थकर्तर्यन्वयो न प्राप्नोति।

· निपातानां वाचकत्वे का क्षतिः।

- चैत्रमिव पश्यति, साक्षात्क्रियते गुरुः, इत्यादिषु प्रयोगेषु चैत्रनामार्थस्य इवार्थसादृश्ये भेदेन अन्वयापत्तिः, तथैव साक्षात् इति निपातार्थस्य धात्वर्थे साक्षाद् भेदेनान्वयप्रसङ्गो प्रसज्यते। यच्च नामार्थयोरभेदातिरिक्त सम्बन्धो न जायते तथैव, नामार्थधात्वर्थयोरपि साक्षात् भेद सम्बन्धेन अन्वयो न भवति, तस्माद् निपातानां द्योतकत्वमेव स्वीकार्यम्। नैयायिकैरुच्यते यत् एतादृशस्थलेषु निपातातिरिक्त समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयः। तथैव

प्र० वायुः विकुरुते

सैन्धवाः विकुर्वते । इत्यत्र धातुः सकर्मको-ऽकर्मको वा ?

उ० अत्र धातुरकर्मकोऽस्ति

प्र० धवश्च खदिरश्च इत्यत्र समुच्चयार्थक-चयोगे षष्ठी कथं न ?

उ० चकारस्य द्योतकत्वात्

प्र० चकारस्य आहोस्वित् निपातस्य द्योतकत्वाद् निपातानां प्रातिपदिकसंज्ञा कथं सिद्ध्यति ?

उ० द्योत्यार्थमादाय, अथवा अव्ययादाप्सुपः अव्ययाद् विभक्तिलुग् विधानात् /। कृत्तद्धितसमासाश्च इति चकाराद् वा।